॥श्रीगणेशायनमः॥ ॥श्रीवेणीमाधवाभ्यांनमः॥ ॥श्रीगंगायमुनासरस्वतीभ्योनमः॥ ॥स्नाना
नितुपरित्यज्यभार्यांपादचारैनरैः॥कुंडिकालोठनींचैवबद्धाकार्पटिकाकृतिः॥१॥प्रथमेचा
लभेत्तीर्थेप्रणवेनजलंशुचिः॥मैत्रोच॥ॐनमोदेवदेवायशितिकंठायवेधसे॥रुद्रायचा
पहस्तायचक्रिणेदंडिनेनमः॥१॥सरस्वतीचसावित्रीवेदमाताथैवच॥सन्निधाना
भवत्वत्रतीर्थेपापप्रणाशिनी॥२॥आभ्यांतीर्थंनमस्कृत्यआलभेत्ततस्तीर्थजलं
गृहीत्वातीर्थोक्ष्वतुर्हस्तांभूमिंपरित्यज्यपाणिपादमुखोनिरक्षालयसयवाक्षत
जलं२ पुष्पफलंगृहीत्वापूजेत॥ब्रह्मकमंडलुसंभूतेगंगेत्रिपथगामिनि॥त्रैलोक्यवंदितेदेवि
गृहाणार्घ्यंनमोस्तुते॥ [अंजलिनातीर्थमध्येअर्घ्यंदत्वा] पुनर्गृहीत्वा।गंगायमुनयोर्मध्येयत्रगुप्तासरस्वती॥त्रैलोक्यवं० ॥१॥

नमोस्तुते ॥२॥ अनेन मंत्रेणांजलिना तीर्थे क्षिपेत् ॥ आचम्य प्राणानायम्य प्राय
श्चित्त अधिकारार्थं मलस्नानमहं करिष्ये । अमंत्रं त्रिः स्नात्वा ॥ द्विराचम्य । बहिरा
गत्य तिलदर्भब्रह्मदंडं गृहीत्वा । सेमस्तसंपदित्यादि श्लोकान् पठन् सकृत् त्रि
र्वा प्रदक्षिणमावर्त्य ब्रह्मदंडं ब्राह्मणानां पुरतः स्थाप्य । साष्टांगं प्रणिपत्य तेषां
पुरत उपविश्य भवदनुज्ञया मम इहजन्मनि जन्मांतरकृतानां पापानां अनुवा
दं नमहं करिष्ये । ओं कुरुक्षेत्रे ते रुद्र प्राणानायम्य ॥ ओं नमो देवं० वेधसे । रु
द्रायच्चा० वेधसे नमः ॥१॥ सरस्वतीचं० गरीयसी । संनिधानां कुं० प्रणाशिनी ॥२॥
तीक्ष्णदंष्ट्र महाकाय कल्पांतदहनोपम । भैरवाय नमस्तुभ्यं अनुज्ञां दातुम

हरस्नायेच क्रिजोर२

देवाय वधि तैकंमाय३

सावित्रीवेदमाता२

भव…तीर्थेपाप२

ह्सि॥श्री॥नमस्कृत्य॥संकल्पं कुर्यात्॥ ॥श्रीमदनंतवीर्यस्यादिनारायणस्याचिंत्या
परिमितेशक्त्याध्रियमाणस्य महाजलौघमध्ये परिभ्रममाणानामनेककोटिब्र
ह्मांडानामेकतमेऽव्यक्तमहदहंकारपृथिव्यप्तेजोवाय्वाकाशाद्यावरणैरावृते ब्रह्मां
डखंडयोर्मध्ये आधारशक्तिकूर्मानंताष्टदिग्गजोपरिप्रतिष्ठिते सप्तपातालोपरिभा
गे सत्यांतलोकषट्कस्याधोभागे महाकूर्मायमानस्य शेषस्य सहस्रफणामणि
मंडिते दिग्दंतिदंतशुंडादंडैर्दंडिते लोकालोकाचलवलयिते लवणेक्षुसुरासर्पि
म॰फ॰२ र्दधिक्षीरोदार्णवपरिवृते जंबूप्लक्षशाल्मलिकुशक्रौंचशाकपुष्करसप्तद्वीपदी
पिते कांस्यताम्रगभस्तिनागसौम्य गंधर्वचारणभरतादिनवखंडखंडिते ॥२॥

भरतवर्षे भरतखंडे अयोध्या मथुरा माया काशी कांती अवंतीका द्वारावती कुरुक्षेत्रा पुष्करादि
नानातीर्थयुक्तकर्मभूमौ मध्यरेखायाः पूर्वदिग्भागे भागीरथ्याः पश्चिमतीरे सकळजगत्स्र
ष्टुः परार्द्धद्वयजीविनो ब्रह्मणो द्वितीयपरार्द्धे द्वितीयपरार्द्धस्य प्रथमे वर्षे प्रथमे मासे प्रथ
मदिवसे अहनि द्वितीययामे तृतीये मुहूर्ते प्रथम घटिकायां सप्तमे वैवस्वतमन्वंतरे अष्टा
विंशतिमे कलियुगे प्रथमचरणे बौद्धावतारे विक्रमशाके अमुकसंवत्सरे अयने ऋतौ
मासे पक्षे तिथौ वारे नक्षत्रे यथावर्त्तमान योग करणे अमुक राशिस्थिते चंद्रे अमुक राशि
स्थिते रवौ अमुक राशिस्थिते गुरौ एवं गुण विशेषण विशिष्टायां पुण्यतिथौ इह जन्मनि ममर
जन्मांतरे वा संचितानां पातकानां ब्रह्महनन मद्यपान सुवर्णस्तेय गुरुतल्पगमन

तत्संसर्गरूपमहापातकानां बुद्धिपूर्वकाणां अबुद्धिपूर्वकाणां मनोवाक्कायकृतानां ब
हुकालाभ्यस्तानां उपपातकानां नीचस्य शास्त्र संकलीकरण मलिनीकरण अपात्रीकर
ण जातिभ्रंशकरण रसविक्रय कन्याविक्रय गोविक्रय खरोष्ट्रमाहिषीविक्रय दासीवि
क्रे अश्वविक्रय अजादिपशुविक्रय ग्रामब्राह्मणत्वं दुर्ब्राह्मणत्वं निरर्थकवृक्षछेदन
करण नपाकरण ब्रह्मस्वापहरण ब्राह्मणनिंदा गुरुनिंदा वेदनिंदा शास्त्रनिंदा अभ
क्ष्यभक्षण अभोज्यभोजन अचोष्यचोषण अपेयपान अस्पृश्यस्पर्शन अश्राव्यश्र
मा वण अघ्रेयघ्राण अहिंस्यहिंसन अनर्वंद्यवंदन अचिंत्यचिंतन अयाज्ययाजन
अपूज्यपूजन पूज्यव्यतिक्रम मातृपितृतिरस्कार स्त्रीपुरुषप्रीतिभेदन मैत्रीभे ॥३॥
मा

दनपरस्त्रीगमनक्षत्रियस्त्रीगमनवैश्यस्त्रीगमनशूद्रीगमनब्राह्मणीगमनविधवाग
मनदासीगमनवेश्यागमनचंडालादिहीनजातिस्त्रीगमनपशुयोनिगमनअयोनि
बीजपातनकूटसाक्षित्ववादपैशून्यवादमिथ्यावादपरद्रव्यापवादपरद्रोहहानिकरण ६।।३
म्लेंछभाषाभाषणम्लेंछसहासनब्रह्मद्वेषकरणस्वामिभेदनमित्रवंचनभार्या
वंचनगर्भपातनरजस्वलागमननिषिद्धकालमैथुनसकामपरस्त्रीस्तनस्प
र्शनविकारभाषणपथितांबूलचर्वणहीनसेवनअन्त्यजभाषणपरान्नभोजनक्षे
साक्षिभोजनगणान्नभोजनभ्रूणहिंसापशुहिंसाबालहिंसास्त्रीहिंसा [illegible]
स्नानत्यागसंध्यात्यागवैश्वदेवत्यागदेवपूजात्यागअतिथित्यागऔपासनत्याग

आत्मार्थपाककरणाकामिश्रान्नभोजनबालकैः सहभोजननखमुखभोजनपंक्तिभेदकरणादी
नांपातकानांलघुपातकानांस्थूलसूक्ष्माद्रीणांक्षालनदूर्वकंराहुपरागनिमित्तकुरुक्षेत्रा
धिकरणश्रोत्रियसंप्रदानकसहस्रसुवर्णभारदानजन्यफलदशगुणाधिक्यसंगतगंगास्ना
नफलशतगुणसागरसंगतगंगास्नानफलशतगुणकाश्युत्तरवहागंगास्नानफलशत
गुणगंगायमुनासंगमस्नानफलसहस्रगुणफलप्राप्तिपूर्वकंसमस्तपितॄणांअक्षय्यवि
ष्णुलोकप्राप्तिकामः पश्चिमवाहिनीस्नानमहंकरिष्ये। त्रिःस्नात्वाहिरण्यमुंडनंकार
येत्॥तत्रक्रमः॥ यावच्छेदनीयनखरोमसमानसंख्यावर्षसहस्राविच्छिन्नस्वर्गमहितत्वकामो
गंगायांसमस्तपापक्षयार्थंवपनंकरिष्ये॥ आत्मनःशुद्धिकामोवापितॄणांमुक्तिहेत ॥४॥

वेणीवपनं करिष्यामि तीरे हंसवजाह्नवि ॥१॥ यानिकानि च पापानि ब्रह्महत्यासमानि च । केशानाश्रि
त्य तिष्ठंति तस्मात्केशान्वपाम्यहं ॥२॥ महत्पापोपपापौघाः केशलोमनखादिजाः । क्षुरादि
च्छिन्नसर्वांगास्ते मे दोषाः पतंत्वधः ॥३॥ यावंति नखलोमानि निवासुनाप्रेरितानि वै । पतंति जाह्न
वीतोये नराणां पापकर्मणां ॥४॥ तावद्वर्षसहस्राणि स्वर्गलोके महीयते । गंगां प्राप्य सरिच्छ्रेष्ठां
कैर्षते पापसंचयाः ॥५॥ केशानाश्रित्य तिष्ठंति तस्मात्केशान्वपाम्यहं । केशानां यावती संख्या छि
न्नानां जाह्नवीजले ॥६॥ तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ ॥दक्षिणाकर्णमूलमारभ्य
शिरोवपनं उदकसंस्थं । नखनिकृंतनमपि उदकसंस्थमेव । केशान्नखादि च तीरभुवि निक्षिपेत् ।
प्राणानायम्य पूर्वांगानि करिष्ये । दंतकाष्ठं हस्ते गृहीत्वा । आयुर्बलं यशो वर्चः प्रजाः पशुवसू

निच।आलप्रशोवमे धांचत्वन्नो देहि वनस्पते॥इति दंतकाष्ठं प्रार्थ्य॥मुखदुर्गंधिनाशाय दंतानांच
विशुध्धये।ष्ठीवनाय च गात्राणां कुर्वेहं दंतधावनं॥दंतकाष्ठं भक्षयित्वा जिह्वोल्लेखनं कुर्यात्।
नाद प्रक्षाल्य विसर्जयित्वा।ततः द्रव्यस्नानं कुर्यात्।भस्म हस्ते गृहीत्वा।सर्वेषामेव देवानां पूज्या
रुद्रोत्र देवता।तस्मात्सवित्रं भस्मेनैतेन स्नानमं[illegible]पहं॥मानस्तोकेति॥अग्निरिति भस्म। घार्ट
जलमिति भस्म।स्थलमिति भस्म।व्योमेति भस्म।सर्वं ह वा इदं भस्मेति भस्म गृहीत्वा॥
ईशानाय नम इति शिरसि।तत्पुरुषाय नम इति मुखे।अघोराय हृदये।वामदेवाय गुह्ये।
सद्योजाताय नम इति पादयोः।प्रणवेन सर्वांगे।पुनः स्नात्वा द्विराचम्य।ततो गोमयस्ना
नं।गोमयं हस्ते गृहीत्वा।अग्रमग्रं चरंतीनामोषधीनां वने वने।तासामृषभपत्नीनां प ॥५॥

वित्तं कायपरो धनं । यन्मे रोगांश्च शोकांश्च नुद गोमय सर्वदा । गंधद्वारामिति स
र्वांगे । पुनः स्नात्वा द्विराचम्य ॥ अथ मृत्तिकास्नानं ॥ बलिस्थापर्वतानामिति भूमिमभिमं
त्र्य । मा वो रिषत्खनिता इति खनित्वा । स्योना पृथिवीति मृदमादाय । आयने ते इति दूर्वा ६२
आदाय । गायत्र्याभ्युक्ष्य । भूमौ मृदं निधाय । आचम्य देशकालौ संकीर्त्य मम स्नानमहं
द्रके ४ करिष्ये इति संकल्प्य । मृदं त्रिधा कृत्वा नाभ्युक्षेत् । ततो दिक्षु मृदं क्षिपेत् । त्रातारमिंद्रं पूर्व
स्यां । यमाय मधुमत्तममिति दक्षिणस्यां । तत्त्वा यामीति पश्चिमतः । वयं सोम व्रते
तरतः । तत्सूर्यमित्यूपरिष्टात् । अधः परि पश्चेत्यधः । ततोंगेषु । सहस्रशीर्षेति शिरसि ।
अक्षीभ्यां तद्इति मुखे । ग्रीवाभ्यास्त इति ग्रीवायां । श्रोत्रेभ्यस्त इति हृदये । नाभ्या ना

त्रिणद्वितिनासो। खमिंदसजोषसम्मितिवाक्योः। सोमानमितिकक्षयोः। पः कुक्षिरितिकुक्ष्योः।
वक्षीनांपितेतिपृष्ठे। ऊरुभ्यां इत्यूर्वोर्मेहनोदनमितिमेढ्रे। एतावानस्येतिपादयोः। पस्यूवि
श्वानीतिहस्तयोः। अंगादंगादित्यनेनपुरुषसूक्तेनन्यसर्वांगोद्वर्तनं॥ अश्वक्रांतेरथक्रांते
विष्णुक्रांतेवसुंधरा। शिरसाधारयिष्यामिरक्षस्वमांपदेपदे। इतिमृत्तिकां दूर्वांशिर
सिनिधायमृत्तिकास्नानंप्रक्षालयेत्। हिरण्यपर्ण०। पुनः। इमंमेगंगे०। इदंते
न्याभिः०। गंगागंगेति। सुमित्र्यानआपः। समुद्रज्येष्ठा०। एतोन्विंद्रं०। तरत्समंदी०।
पावमानीः०। आपोहिष्ठा इत्यादिभिमार्जनंकृत्वा इमंमेगंगे इत्युदकमालोड्याघमर्
षणंकुर्यात्॥ ततःप्रवाहाभिमुखंत्रिर्मज्जेत्। गायत्र्याचगोमूत्रंगंधद्वारामिति ॥६॥

गोमयं। आप्यायस्वेति क्षीरं। दधिक्राव्ण इति दधि। घृतं मिमिक्ष इति घृतं। देवस्य त्वेति कुशो
दकं। एवं दशस्नानानि कृत्वा स्वसूत्रोक्तप्रकारेण स्नानं कुर्यात्। भूर्देवादृषिजलतर्पणं २ त्वा
कृत्वा। बहिरागत्य वाससी परिधाय तिलकं धृत्वा संध्यादि संपाद्य। स्वोपर्तिस्थैः हिरण्य
श्राद्धं कृत्वा। अंते देवऋषिपितृपूर्वकं तर्पणं कृत्वा अंते पुराणमंत्रैरेकांजलिर्देयः। विष्णु
पुराणे। देवासुरास्तथा नागा यक्षा गंधर्वराक्षसाः। पिशाचा गुह्यकाः सिद्धाः कूष्मांडा
स्तरवः खगाः। जलेचरा भूमिचरा वाघाधाराश्च जंतवः। तृप्तिमेतेन तेयांतु मद्दत्तेनांबुना
खिलाः। नरकेषु समस्तेषु यातनासु च ये स्थिताः। तेषामाप्यायनायैतद्दीयते सलिलं मया। ये
बांधवा बांधवा वा ये न्यजन्मनि बांधवाः। ते तृप्तिमखिला यांतु ये चास्मत्तोयकांक्षिणः। ४

यत्र क्वचन संस्थानां क्षुत्तृट्पापहतात्मनां। इदमक्षय्यमेवास्तु मया दत्तं तिलोदकं ॥ ५ ॥ ॥ शालग्राम
समीपे वैष्णवश्राद्धं कृत्वा तत्र कारः। प्राणानायम्य श्रीविष्णुप्रीत्यर्थं प्रायश्चित्तांगभूतं वैष्णव
श्राद्धं करिष्ये। गोदानं ब्राह्मणाय दद्यात्। गवामंगेषु तिष्ठंति। गावो मे अग्रतः सन्तु। इति गोदानमंत्रः।
विष्णुप्रीत्यर्थं प्रायश्चित्तांगभूतं हवनं करिष्ये। आज्यहोमं करिष्ये। ततः परिसमूहनादि आ
ज्यहोमं अष्टोत्तरसहस्रं अष्टोत्तरशतं वा व्याहृतिभिः कृत्वा। ततः पंचगव्यहोमं कुर्या
त्। गोमूत्रं ताम्रवर्णायाः श्वेतायाश्चैव गोमयं। पयः कांचनवर्णायाः नीलायाश्चैव
वै दधि। घृतं तु सर्वकृष्णायाः सर्वं कापिलमेव च॥ आसामभावे सर्ववर्णानां ग्राह्यं। पात्रं त्रा
मध्यपत्रे पद्मपत्रे सौवर्णे राजते ताम्रपात्रे वा पलपरिमितं अर्धमाषपरिमितं अंगुष्ठा ॥ ७ ॥

र्दषपरिमितं वा गोमूत्रं स्वर्णरूप्यपात्रे गायत्र्या प्रणवेन वा निक्षिपेत्। षोडशमाषपरिमितं
अंगुष्ठार्धपरिमितं वा गोमयं गंधद्वारेति प्रणवेन वा। द्वादशमाषपरिमितं क्षीरं आप्या
यस्वेति प्रणवेन वा। सार्द्धांगुष्ठद्वयपरिमितं दधि क्राव्णा इति प्रणवेन वा। माषैक
परिमितं घृतं। घृतं मिमिक्ष इति प्रणवेन वा। माषचतुष्टयं कुशोदकं देवस्य त्वेति
प्रणवेन वा। प्रणवं समुच्चार्य हस्तेन सर्वं नालोड्य। पुनः प्रणवमुच्चार्य यज्ञकाष्ठेन
निर्मथ्य। पुनः प्रणवमुच्चार्य अभिमंत्र्य सप्तकुशपत्रैः पंचगव्यं गृहीत्वा इरावती०। स्वाहा।
विष्णवे इदं०। इदं विष्णुः० स्वाहा। विष्णवे इदं०। मानस्तोके० स्वाहा। रुद्रायेदं०। अग्नींद्राग्नी० स्वा
हा। इंद्राग्निभ्यामिदं०। अग्नये स्वाहा। अग्नये इदं०। सोमाय स्वाहा। सोमायेदं०। ओं तत्स

वितुः॰ स्वाहा॥ सवित्र इदं॰ ॐ स्वाहा॥ प्रजापतय इदं॰॥ व्याहृति चतुष्टयं॥ अग्नये स्विष्ट
कृत इति दत्वा॥ कृतीं कृत्वा होमशेषं समाप्य पंचगव्यप्रोक्षं सोपाङ्के संध्यादिकं कृत्वा त्रि
णावेन सर्वं प्राशयेत्॥ त्वक् चर्मास्थिगतं पापं देहे तिष्ठति मामके॥ प्राशनं पंचगव्य
स्य दहत्यग्निरिवेंधनं॥१॥ प्राशयेत्॥ इति पंचगव्यविधिः॥ ततः प्रायश्चित्तकर्तव्यं प्रा
स्तूणे श्योद्त्वा दशाद्ग्ना निक्षेपी कृ॥ भागीरथ्याः सौवर्णं प्रतिमां कृत्वा ताम्रादि
कलशोपरि स्थापयित्वा तदुपरि वस्त्रं प्रसार्य अष्टदलं कृत्वा प्राणायामादि॰ भा
गीरथी पत्रागतया भागीरथी पूजनं करिष्ये॥ षोडशोपचारैः संपूज्य॥ ततः प्रातः अ
न्नेन तीर्थश्राद्धं कृत्वा गंगाप्रीत्यर्थं सुवासिनी भोजयित्वा॥ आचार्याय गोदानेन स ॥८॥

हस्तिनं मां दृष्ट्वा। ततस्तीर्थप्रार्थना॥ महापापोपपापादि नानायोनिषु यत्कृतं। तीर्थेषु यत्कृतं पापं
साक्षाद्दृष्ट्यादि यत्कृतं॥१॥ बाल्यभावादि यत्पापं परस्त्रीहादिकं मया। देहादिमानसं पापं स
र्वदा यन्मया कृतं॥२॥ भूतं भव्यं भविष्यं च यत्पापं मम जायते। विशुद्धमार्गे च यत्पापं जानताजा
नता कृतं॥३॥ मनसा कर्मणा वाचा यद्यत्पापं मया कृतं। तस्मादशेषपापौघात्त्राहि जा
ह्नवि सर्वदा॥४॥ गतं पापं गतं दुःखं गतं दारिद्र्यमेव च। निःपापोस्म्यद्य धनादेवि प्रसादा
त्तेव नान्यथा॥५॥ ॥तत्र वेणीदानविधिः॥ अत्रापि नोन्मुक्तकेशावपनं किंतु वेणीं कृत्वा
कुंकुमादिद्रव्येनालंकृतां भर्तारं नमस्कृत्य तदनुज्ञया वापयेत्। तां च वेणीमंजलौ निधा
य तत्र यथाशक्ति कृतां सुवर्णमयीं वा वेणीं मुक्ताप्रवालादि च निधाय॥ वेण्यां वेणीप्रदा

नेनसर्वपापंप्रनश्यतु।जन्मांतरेष्वपि सदा सौभाग्यं मम वर्द्धतां॥२॥सुमंगलीति मंत्रं पठित्वा
वेण्यांक्षिपेत्।इदंच प्रथमयात्रायाः।अत्रैव नकुत्रापि।सर्वशिष्टानां आचारः॥वंशपात्रमिदं
श्रेष्ठं सौभाग्याद्यसमन्वितं।वंशानामुत्तमं दानमतः शांतिं प्रयच्छमे॥१॥यथारत्नेषु सर्वे
षु सर्वे देवाव्यवस्थिताः।तथाशांतिं प्रयच्छंतु रत्नदानेन मे सुराः॥२॥इति रत्नदानं॥इदं गृ
हं गृहाण त्वं सर्वोपस्कारसंयुतं।तव विप्र प्रसादेन ददस्वाभिमतं फलं॥१॥गृहदानं॥
देयानि वंशपात्राणि ससप्तसोपस्कराणि च।जाह्नवी तीरवासिभ्यो ब्राह्मणेभ्यो निवेदये
त्॥वंशपात्रदानं॥एतत्पूर्वदिने कार्यं।तीर्थश्राद्धानंतरं वा॥सायाह्नेथवा रात्रौ तीर्थश्रा
द्धं च प्रयुज्यते।पूर्वाह्ले चैव कर्त्तव्यं इदं श्राद्धं ततः परं॥१॥अथ दशदानमंत्राः॥दिवोदासे। ॥८॥

भूमिर्गोचर्ममात्रापि तिलक्रोष्णाद्धयेन था। गौः सुरभी न्याच दोग्ध्री च धेनुर्भैराज्यं च पंचभिः॥१॥
पलमेकं तुरीयस्य सुवर्णस्य सुवर्णकं। दशवर्णैर्महादानं दातव्यं च मुमुक्षुणा परं॥ गोभूति
लहिरण्याज्यवासो धान्य गुडानि च। रौप्यं तुलवर्णैश्चैव दशदानं क्रमः स्मृतः॥२॥ गा
वामंगे प्रतिष्ठंति। गावो मे अग्रतः संतु। गोदानं॥ सर्वभूताश्रया भूमिर्वराहेण समुद्धृ
ता। अनंतसस्यफलदा अतः शांतिं॥ भूदानं॥ महर्षेर्गोत्रसंभूताः कश्यपस्य तिलाः स्मृ
ताः। तस्मादेषां प्रदानेन मम पापं व्यपोहतु॥ तिलदानं॥ हिरण्यगर्भगर्भस्थमिति हिरण्य
दानं॥ कामधेनोः समुद्भूतं सर्वक्रतुषु संस्थितं। देवानामाज्यमाहारमतः शांतिं॥ आज्यदानं।
॥ एवं सर्वलोकानां लज्जाया रक्षणं परं। सुवेषधारि वस्त्रं च अतः शांतिं॥ वस्त्रदानं॥ सर्व

देवमयं धान्यं सर्वौस्वत्तिकरं महत्॥ प्राणिनां जीवनोपायमतः शांति॥ धान्यं॥ प्रणवः सर्वदेवानां नारीणां
पार्वती यथा॥ तथा रसानां प्रवरः सर्वेषां रसो नतः॥ ममतस्मात्परां लक्ष्मीं ददस्व गुड सर्वदा॥ गुड
दानं॥ प्रीतिर्येन पितॄणां च विष्णुशंकरयोस्तथा॥ शिवनेत्रोद्भवं रौप्यमतः॥ रौप्यदानं॥ यस्मान्न दैवं देवे
रसाः सर्वे नोत्कृष्टा लवणं विना॥ शंभोः प्रीतिकरं नित्यम०॥ इति लवणदानं॥ ॥श्रीदेव्यै नमः॥
॥इति प्रयागस्नानविधिः॥ ॥संवत् १७५२ माघ शुद्ध नवम्यां शनौ अगस्तीश्वर तथा ब्रह्मेश्वर
सन्निधौ उभयोर्मध्ये निलकंठे इदं रूपनामकं विश्वनाथभट्टात्मज सर्वोत्तमेन लिखितं॥ ॥
श्रीरस्तु॥ ॥सर्वजगतः॥ श्रीकृष्णार्पणमस्तु ॥ ॥श्रीभवानीशंकराभ्यां नमः॥ ॥